# ८. पादुका सहस्रम् - निर्यातना पद्धतिः (३०)

अभिषेकोत्सवात् तस्माद्यस्या निर्यातनोत्सवः ।
अत्यरिच्यत तां वन्दे भव्यां भरत देवताम् ॥ ८.१॥ २११॥

उपास्य वर्षाणि चतुर्दश त्वां उत्तारिका मुत्तरकोसलस्थाः ।
सनन्दनाद्यै रपि दुर्विगाहं सान्तानिकं लोक मवापु रग्र्यम् ॥ ८.२॥ २१२॥

पादावनि प्रत्ययितो हनूमान् सीतामिव त्वां चिरविप्र युक्ताम् ।
प्रणम्य पौलस्त्य रिपोरुदन्तं विज्ञापयामास विनीतवेषः ॥ ८.३॥ २१३॥

तवाभिषेकान् मणिपादरक्षे मूले निषेकादिव वृद्धियोग्यात् ।
जहुस्तदैव त्रिदशाङ्गनानां प्रम्लानतां पत्रलताङ्कुराणि ॥ ८.४॥ २१४॥

सर्वत स्त्वदभिषेक वासरे सम्यगुद्धृत समस्त कण्टके ।
राघवस्य विपिनेषु पादुके यत्रकामगमता व्यवस्थिता ॥ ८.५॥ २१५॥

किं चतुर्दशभिरेव वत्सरै र्नित्यमेव मणिपादुके युवाम् ।
पादयो स्त्रिभुवनाधि राजयो र्यौवराज्य मधिगच्छतं स्वयम् ॥ ८.६॥ २१६॥

रामस्य राक्षस वध त्वरितस्य काले
पादावनि प्रकटयन्निव पार्ष्णि गुप्तिम् ।

आचित्रकूट मधिगम्य शशंस वार्ताम्
अव्याहतत्व दभिषेक मृदङ्ग नादः ॥ ८.७॥ २१७॥

भद्राणि देवि जगतां प्रतिपादयिष्यन्
प्रागेव येन भवतीं भरतोऽभ्य षिञ्चत् ।
मन्ये कपीश्वर विभीषणयो र्यथावत्-
सन्तन्यते स्म तत एव किलाभिषेकः ॥ ८.८॥ २१८॥

सम्भिद्यमान तमसा सरयूपनीतैः
संवर्धितस्तव शुभै रभिषेक तोयैः ।
मन्ये बभूव जलधि र्मणिपादरक्षे
रामास्त्र पावक शिकाभि रशोषणीयः ॥ ८.९॥ २१९॥

पादावनि त्वदभिषेचन मङ्गलार्थं
भेरीशतं भृश मताड्यत यत्प्रतीतैः ।
आकर्ण्य तस्य सहसा तुमुलं निनादं
लङ्का कवाट नयनानि निमीलितानि ॥ ८.१०॥ २२०॥

तापोद्गम स्त्वदभिषेक जलप्रवाहैः
उत्सारित स्त्वरित मुत्तरकोसलेभ्यः ।
लेभे चिराय रघुपुङ्गव पादरक्षे
लङ्कावरोध सुदृशां हृदयेषु वासम् ॥ ८.११॥ २२१॥

आवर्जितं विधिविदा मणिपादरक्षे
        पद्मासन प्रिय सुतेन पुरोहितेन ।
आसीन्निदान मभिषेक जलं त्वदीयं
        नक्तञ्चर प्रणयिनी नयनोदकानाम् ॥ ८.१२॥ २२२॥

देवि त्वया स्नपन सम्पदि संश्रितायां
        दग्धे पुरे दशमुखस्य वलीमुखेन ।
आसीत् ततः प्रभृति विश्वजन प्रतीतं
        अद्भ्योऽग्निरि त्यवितथं वचनं मुनीनाम् ॥ ८.१३॥ २२३॥

आयोध्यकै स्त्वदभिषेक समिद्धहर्षैः
        आध्मापिताः श्रुतिसुखं ननु ते तदानीम् ।
रामस्य राक्षस शिरो लवनेऽप्यशाम्यन्
        येषां ध्वनि र्विजय शङ्खरवो बभूव ॥ ८.१४॥ २२४॥

प्रथयितु मभिषेकं पादुके तावकीनं
        दुरित शमन दक्षे दुन्दुभौ ताड्यमाने ।
सपदि परिगृहीतं साध्वसं देवि नूनं
        दशवदन वधूनां दक्षिणै र्नेत्रकोशैः ॥ ८.१५॥ २२५॥

रघुपति पदरक्षे रत्नपीठे यदा त्वां

अखिल भुवन मान्या मभ्यषिञ्चद्वसिष्ठः ।
दशमुख महिषीभि र्देवि बाष्पायिताभिः
स्तनयुग मभिषेक्तुं तत्क्षणा दन्वमंस्थाः ॥ ८.१६॥ २२६॥

रामास्त्राणि निमित्त मात्रमिह ते लब्धाभिषेका स्वयम्
रक्षस्तत् क्षपयाञ्चकार भवती भद्रासनस्थायिनी ।
यद्घोष्णा मतिवेल दर्पदवथु ज्वालोष्मलानां तदा
निष्पिष्टैः कलधौत शैलशिखरैः कर्पूर चूर्णायितम् ॥ ८.१७॥ २२७॥

श्रुत्वैवं हनुमन्मुखा द्रघुपतेः प्रत्यागतिं तत्क्षणात्
आसीदद्भुर तानुवर्तन वशा दारूढ कुम्भस्थलाम् ।
कालोन्निद्र कदुष्ण दान मदिरा माद्यद्द्विरेफ ध्वनि-
श्लाघा चाटुभि रस्तुतेव भवतीं शत्रुञ्जयः कुञ्जरः ॥ ८.१८॥ २२८॥

प्रत्यागतस्य भवती मवलोक्य भर्तुः
पादारविन्द सविधे भरतोपनीताम् ।
पूर्वाभिषेक विभवाभ्युचितां सपर्यां
मध्ये सतामकृत मैथिल राजकन्या ॥ ८.१९॥ २२९॥

सम्प्रेक्ष्य मैथिल सुता मणिपादरक्षे
प्रत्युद्गतस्य भवतीं भरतस्य मौलौ ।
निर्दिश्य सा निभृत मञ्जलिना पुरस्तात्-

तारादिकाः प्रियसखी रशिषत् प्रणन्तुम् ॥ ८.२०॥ २३०॥

तुल्येऽपि देवि रघुवीर पदाश्रयत्वे
पूर्वाभिशेक मधिगम्य गरीयसी त्वम् ।
तेनैव खल्व भजतां मणिपादरक्षे
रक्षः प्लवङ्ग मपती भवतीं स्वमूर्ध्ना ॥ ८.२१॥ २३१॥

निर्वृत्त राक्षस चमू मृगया विहारो
रङ्गेश्वरः स खलु राघव वंशगोप्ता ।
वंशक्रमा दुपनतं पदमाददानो
मान्यं पुनस्त्वयि पदं निदधे स्वकीयम् ॥ ८.२२॥ २३२॥

तत्तादृशोश्चरणयोः प्रणिपत्य भर्तुः
पौरास्त्वया विधृतयोः प्रतिपन्न सत्त्वाः ।
प्राप्ताभिषेक विभवामपि पादुके त्वां
आनन्द बाष्प सलिलैः पुनरभ्यषिञ्चन् ॥ ८.२३॥ २३३॥

मातस्त्वयैव समये विषमेऽपि सम्यक्
राजन्वतीं वसुमती मवलोक्य रामः ।
सञ्जीवनाय भरतस्य समग्र भक्तेः
सत्यप्रति श्रवतयैव चकार राज्यम् ॥ ८.२४॥ २३४॥

पादावनि प्रतिगतस्य पुरीमयोध्यां
पौलस्त्य हन्तु रभिषेक जलार्द्रमूर्तेः ।
अंसे यथार्ह मधिवास्य निजै र्यशोभिः
कस्तूरिकेव निहिता वसुधा त्वयैव ॥ ८.२५॥ २३५॥

याऽसौ चतुर्दश समाः पति विप्र युक्ता
विश्वम्भरा भगवती विधृता भवत्या ।
विन्यस्य तां रघुपते र्भुज शैलशृङ्गे
भूयोऽपि तेन सहितां भवती बभार ॥ ८.२६॥ २३६॥

निस्तीर्ण दुःख जलधे रनघस्य देवि
त्वत्सम्प्रयुक्त रघुनाथ पदान्वयेन ।
सद्यः सनन्दन मुखैरपि दुर्निरीक्षा
साम्राज्य सम्पदपरा भरतस्य जज्ञे॥ ८.२७॥ २३७॥

निर्गत्य देवि भरताञ्जलि पद्ममध्याद्
भूयः समागतवती पुरुषोत्तमेन ।
पद्मेव भद्रमखिलं मणिपादरक्षे
प्रादुश्चकार भवती जगतां त्रयाणाम् ॥ ८.२८॥ २३८॥

रघुपति मधिरोप्य स्वोचिते रत्नपीठे
प्रगुण मभजथास्त्वं पादुके पादपीठम् ।

तदपि बहुमतिस्ते तादृशी नित्यमासीत्
क्क नु खलु महितानां कल्प्यते तारतम्यम् ॥ ८.२९॥ २३९॥

अनुवृत्त राम भावः शङ्के निर्विष्ट चक्रवर्ति पदाम् ।
अधुनाऽपि रङ्गनाथः सचमत्कारं पदेन भजति त्वाम् ॥ ८.३०॥ २४०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
निर्यातना पद्धतिः अष्टमी ॥